श्रीगणेशायनमः श्रीगुरुभ्योनमः श्रृंगारवीरसौहार्दमौग्ध्यवैयात्यभूषणं लास्यतांडवसौजन्यदांपत्यंतद्भजामहे १ वीणांकितकरादेवीवा
णीमेणीदृशंमुदा सदानंदमयींदेवीसरोजभववल्लभां २ स्वच्छस्वादुरसाधारोवस्तुछायामनोहरः सेव्यःसुवर्णनिधिभिर्निधिमार्गः सनाय
कः ३ सात्विकाद्यैरभिनयैःप्रेक्षकाणांयतोभवेत् नटेनायकतदात्म्यबुधिस्तन्नाट्यमुच्यते ४ रसोत्कर्षोहिनाट्यस्यप्राणस्तत्सन्निरूप्य
ते वैभावैरनुभावैश्चसात्विकैर्व्यभिचारिभिः ५ आनीयमानः स्वादुत्वंस्थायीभावोरसस्मृतः तत्रज्ञेयोविभावस्तुरसज्ञापनकारणं ६
बुधै[redacted]र्योयमलंबउद्दीपनइतिद्विधा आधारविषयत्वाभ्यांनायिकोभाायिकापिच ७ अलंबनंमतंतत्रनायकोगुणवान्पुमान्
तरुणास्तुमहाभाग्यमौदार्यस्थैर्यदक्षते ८ औज्वल्यधार्मिकत्वंचकुलीनत्वंतुवाग्मिता कृतज्ञत्वंनयज्ञत्वंशुचितामानशीलता ९ ते
जस्विताकलावत्वंप्रजारंजकतादयः एतेसाधारणाःप्रोक्ताःनायकस्यगुणाबुधैः १० सर्वातिशायिराज्यत्वंमहाभाग्यमुदाहृतं यद्दि
श्राणनशीलत्वमौदार्यंतद्बुधाविदुः ११ व्यापारफलपर्यंतंस्थैर्यमाहुर्मणीषिणः दुष्कराक्षिप्रकारित्वंदक्षतांपरिचक्षते १२ औज्वल्यं
नयननानंदकारित्वंकथ्यतेबुधैः धर्मप्रवणचित्तत्वंधार्मिकत्वमितीर्यते १३ कुलेमहतीसंभूतिः कुलीनत्वमुदाहृतं वाग्मितातु
बुधैःप्रोक्तासमयोचितभाषिता १४ कृतानामुपकाराणामभिज्ञत्वंकृतज्ञता शामाद्युपायचातुर्यंनयज्ञत्वंमुदाहृतं १५ अंतःकरणशु
द्धिर्याशुचितासाप्रकीर्तिता अकार्पण्यासहिष्णुत्वंकथितामानशीलता १६ तेजस्वित्वमविज्ञातेरसहिष्णुत्वमुच्यते कलावत्वंनिग
दितंसर्वविद्याकौशलं १७ रंजकत्वंतुसकलचित्ताल्हादनकारिता एतैर्गुणैश्चसकलैरुक्तस्यादुत्तमोनता मध्यःकतिपयंहीनोव
हुगुणहीनोधमोनाम १८ नेताचतुर्विधोसौधीरोदात्तश्चधीरललितश्च धीरप्रशांतनामातनश्चधीरोद्धतःख्यातः १९ दयावानति
गंभीरोविनीतः सत्वसारवान् दृढव्रतस्तितीक्षावानात्मश्लाघ्यापराङ्मुखः २० निगूढाहंकृतिर्धीरोधीरोदात्तउदाहृतः गांभीर्य
माविकारित्वंसत्यपिक्षोभकारणे २१ निश्चिंतोधीरललितस्तरुणीवनिताधगाः समप्रकृतिकल्पेशीसहिष्णुश्चविवेचकः २२

रसा. ललितादिगुणोपेतोविप्रोवासचिवोवणिक् धीरशांतश्चारुदत्तमाधवादिरुदाहृतः २३ मात्सर्यवानहंकारीमायावीरोषणश्चली वि
कथ्यनोभार्गवादिर्धीरोद्धतउदाहृतः २४ एतेचनायकाः सर्वेसरसाधारणामताः शृंगारापेक्षयातेषांत्रैविध्यंकथ्यतेबुधैः २५ पति
१ श्चोपपतिश्चैववैशिकश्चेतिभेदतः पतिस्तुविधिनापाणिग्राहकःकथ्यतेबुधैः २६ चतुर्धासोपिकथितोन्नतकाव्यविचक्षणैः अनुकू
लःशठोधृष्टदाक्षिणश्चेतिभेदतः २७ अनुकूलस्त्वेकजानिःशठोगूढापराधकृत् धृष्टोव्यक्तान्ययुवतिभोगलक्ष्मापिनिर्भयः २८ यो
।नायिकास्वनेकासुतुल्योदक्षिणउच्यते लंघिताचारुपंथास्तुविनापिविधिनास्त्रियः २९ संकेतंनियतेप्रोक्तोबुधैरुपपतिस्तयः
दाक्षिण्यमानुकूल्यंचधार्ष्ट्यंचनियतत्वतः ३० नोचितान्यस्यशाठ्यंस्यादल्पचित्तत्वसंभवात् रूपवान्शीलसंपन्नशास्त्रज्ञःप्रि
यदर्शनः ३१ कुलीनोमतिमान्शूरोरम्यवेषयुतोयुवा अधीनःस्फरभिस्त्यागीसहतःप्रियभाषणः ३२ शंकाविहीनोमानीचदेश
कालविभागवित् दाक्ष्यचातुर्यमाधुर्यसौभाग्यादिभिरन्वित ३३ वेश्योपभोगरसिकोयोभवेत्सतुवैशकः ३४ सात्रिधाकथिताज्येष्ठम
ध्यनीचाविभेदतः असंगोपिस्वभावेनसक्तवच्चेष्टतेमुहुः ३५ त्यागीस्वभावमधुरोसमदुःखसुखःशुचिः कामतंत्रेषुनिपुणःक्रुधानुनय
कोविदः ३६ स्फुरितेच्चापरोकिंचिद्दयितायाविरज्यतिः उपचारपरोह्येषउत्तमःकथ्यतेबुधैः ३७ अलीकमात्रेदृष्टेस्यान्नकुप्यतिनरज्यति
ददातिकालेकालेच्चभागंगृह्णातिभागतः ३८ सर्वार्थैरपिमध्यस्थस्तामेवोपचरेत्पुनः दृष्टदोषेविरज्येतसभवेन्मध्यमोनरः ३९ कर्मतंत्रे
षुनिर्लज्जःकर्कशोरतिकेलिषुः अविज्ञातदयामर्षकृत्याकृत्यविमूढधीः ४० मूर्खःप्रसक्तभावश्चविरलायामपिस्त्रियां मित्रैर्निवार्यमा
णोपिपारुष्यंप्रातितोपि च ४१ अल्पस्नेहसमावृत्तांसंक्रांतरमणामपि स्त्रियंकामयतेयस्तुसोधमःपरिकीर्तितः ४२ अथशृंगारेनेतृणां
सहायाःकरणोचिताः निरूप्यंतेपीठमर्दविटचेटविदूषकाः नायकानुचरोभक्तःकिंचिदूनश्चतद्गुणैः पीठमर्दइतिख्यातःकुपितस्त्रीप्रसा १
दकः ४४ कामतंत्रकलावेदीविटइत्यभिधीयते संधानचतुरश्चेटकलहंसादिकोमतः ४५ विकृतांगवयोवेषैर्हास्यकारीविदूषकः के

शाकालज्ञताभावामाधुर्यंचविदग्धता ४६ प्रोत्साहनेकुशलतायथोक्तकथनंतथा निगूढमंत्रतेत्यापासहायानांगुणामताः॥४७॥ इतिश्रीरसा
र्णवसुधाकरकारिकायांनायकप्रकर्णं॥ ॥नेत्रसाधारणगुणैरुपेतानायिकामता स्वकीयापरकीयाचसामान्याचेतिसात्रिधा१
संपत्कालेविपत्कालेयानमुंचतिवल्लभं शीलार्जवगुणोपेतास्वकीयाकथिताबुधैः २ साचस्वीयात्रिधामुग्धामध्याप्रौढेतिकथ्यते मुग्धान
ववयःकामारतौवामामृदुक्रुधि ३ यततेरतचेष्टायांगूढंलज्जामनोहरं कृतापराधेदयितेवीक्षतेरुदतीसती ४ अप्रियंवाप्रियंवापिनकिंचि
दपिभाषते समानलज्जामदनाप्रोदयौवनशालिनी ५ मध्याकामयतेकांतंमोहांतसुरतक्षमा मध्यात्रिधामानवृत्तेधीराधीराभयात्मि
का ६ धीरातुवक्तिवक्रोक्त्यासोत्प्रासंसगर्वंसप्रियं धीरापरुषैर्वाक्यैःखेदयेद्रुदतीतथा ७ धीराधीरातुवक्रोक्त्यासबाष्पंवदतिप्रियं सं
पूर्णयौवनोन्मत्ताप्रगल्भारूढमन्मथा ८ दयितांगेविलीनेवयततेरतिकेलिषु रतिप्रारंभमात्रेपिगच्छत्यानंदमूर्छनां ९ मानवृत्तेप्रगल्भा
पित्रिधाधीरादिभेदतः उदास्तेसुरतेधीरासावहित्थाचसादरा १० संतर्ज्यनिष्ठुरंरोषाद्धीरानाडयेत्प्रियं धीराधीरगुणोपेताधीराधीरेति
कथ्यते ११ द्विधाज्येष्ठाकनिष्ठेतिमध्याप्रौढेतितादृशी धीराधीरादिभेदेनमध्याप्रौढेत्रिधात्रिधा १२ ज्येष्ठाकनिष्ठाभेदेनताःप्रत्येक
षिधाद्विधा मुग्धात्वेकविधाचैवंसात्रयोदशधोदिता १३ अन्यापिद्विविधाकन्यापरोढाचेतिभेदतः तत्रकन्यात्वनूढास्यात्सालज्जापितृपा
लिता १४ सखीकेलिषुविश्रब्धाप्रायोमुग्धागुणान्विता प्राधान्यमप्रधानेचनाटकादावियंभवेत् १५ मालतीमाधवेलत्येमालतीर
मयंतिके परोढापिपरेणोढाप्यन्यसंभोगलालसा १६ लक्षारुद्रप्रबंधेसासप्रत्यादिककेबुधैः साधारणस्त्रीगणिकाकलाप्रागल्भ्यधा
र्त्यंयुक् १७ एषासाद्विविधारक्ताविरक्ताचेतिभेदतः तत्ररक्तानुवर्ण्याहिप्राधान्येनैवनाटके १८ आग्निमित्रस्यविज्ञेयायथाराज्ञइराव
ती प्रधानमप्रधानेवानाटकेरक्तरूपके १९ साचेद्विमानाटकेतुप्राधान्येनैववर्ण्यते विरक्तातुप्रहसनप्रभृतिष्वेववर्ण्यते २० तस्याधैर्यप्र
भृतयोगुणास्तदुपयोगिनः प्रछन्नवृत्तान्रत्यर्थज्ञान्बालपाखंडपंडितान् २१ रक्तेवरंजयेदिभ्यान्निःस्वान्सातान्विवासयेत् गणिकापा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नानुरागोगुणशालिनिनायके २२ रसाभासप्रसंगस्यादरक्तायास्तुवर्णने अतस्तनास्कार्यैःसावर्ण्यासान्नभवेदिति २३ सामान्यवनितावे
श्यासाद्रव्यंपरमिछति गुणहीनेनचद्वेषोनानुरागोगुणिन्यपि २४ श्रृंगाराभासएवस्यान्नश्रृंगारःकदाचन तन्मतंनानुमनुतेविद्वान्श्रीसिं
धभूपतिः २५ भवानुबंधाभावेननायकाबपरात्पते तस्याःप्रकरणादौचनायिकाबविधानतः २६ अनायिकावर्णयितुंरसाभासप्रसंगकः
तथाप्रकरणादीनांनरसाश्रयतागतेः २७ रसाश्रयतदशेत्यादिवाक्यविरोधतः तस्मात्साधारणस्त्रीणांगुणशालिनिनायके २८ भा
वानुबंधःस्यादेवंरुद्रटस्याभिभाषणात् तथाचरुद्रट ईर्षाकुलस्त्रीषुननायकस्यनिःशंककेलिनपरांगनासु वेश्यासुचैतद्वितयंप्रसि
द्धंसर्वस्वमेतास्तदहास्मरस्य २९ प्रोषितादिभिदाःकेचित्सर्वासामपिमन्वते तास्तुप्रायेणदृश्यंतेसर्वत्रव्यवहारतः प्रथमंप्रोषितपतिका
वासकसज्जाततश्चविरहोत्का अथखंडितामतास्यात्कलहांतरिताभिसारिकाचेति ३१ कथितांथविप्रलब्धास्वाधीनपतिकास्तथाचान्या
श्रृंगारकृतावस्थाविषश्रीश्चाष्टधाभिहिता ३२ दूरदेशगतेकांतेभवेत्प्रोषितभर्तृका अस्यास्तुजागराकार्श्यंनिमित्तादिविलोकनं ३३ मालि
न्यमनवस्थानंप्रायःशय्यानिवेशनं जाड्याचिंताप्रभृतयोविक्रियाःकथिताबुधैः ३४ भर्तांघ्रेरभिदधेस्त्रीणांवासस्तुवासका स्ववास
भवनात्कांतेसमेष्यतिगृहंप्रति ३५ सज्जीकरोतिवस्थानंयासावासकसज्जिका अस्यास्तुचेष्टासंपर्कमनोरथविचिंतनं ३६ सखीविनोद
हल्लेखोमुहुर्दूतीनिरिक्षणं प्रियागमनमार्गादिवीक्षाप्रभृतयोमताः ३७ अनागसिप्रियतमेचिरयत्युत्सुकावया विरहोत्कंठिताभावेवेदि
भिःसासमीरिता ३८ अस्यास्तुचेष्टाहत्तापोवेपथुःस्वांगसादनं अरतिर्बाष्पमोक्षश्चस्वावस्थाकथनादयः ३९ उलंघ्यसमयंयस्याःप्रेया
नन्योपभोगवान् भोगलक्ष्मांचितःप्रातरागछेत्साहिखंडिता ४० अस्यास्तुचिंतानिःश्वासतूष्णींभावाश्रुमोचनं स्वेदभ्रांत्यस्फुटालापाद्या
द्याविक्रियामताः ४१ यासखीनांपुरःपादपतितंवल्लभंरुषा निरस्यपश्चात्तपतिकलहांतरितातुसा ४२ अस्यास्तुभ्रांतिसंतापौमोहोनि
श्वसनंज्वरः मनःसंतापइत्याद्याश्चेष्टादर्शमनीषिभिः ४३ मदनानलसंतप्तायाभिसारयतिप्रियं ज्योत्स्नांतमास्विनीयानयोग्यांवरवि

भूषणा ४४ स्वयंचाभिसरेद्यातुसाभवेदभिसारिका अस्याःसंतापचिंताद्याविक्रियास्तुयथोचितं ४५ कांताभिसरणेस्वीयालज्जानाशादिसंक
या व्याघ्रहुंकारसंत्रस्तमृगशावकलोचना ४६ नील्यादिरक्तवसनरचितांगावगूढना स्वांगेविलीनावयवानिःशब्दपरचारिणी ४७ सखि
गैकसखीमात्रयुक्तानीवसमुत्सुका एषाप्रियेतुनिद्राणेपार्श्वेतिष्ठतिनिश्चला ४८ गर्वातिरेकनिभृतासीतैःस्रग्दामचंदनैः भावज्ञाबोधयत्य
स्यनंतद्रावेक्षणोत्सुका ४९ स्वीयावत्कन्यकान्येया कांताभिसरणक्रमे वेश्याभिसारिकायातिहृष्टावैशिकनायकं ५० अविभ्रंतास्मितमुखी
मदघूर्णितलोचना अनुलिप्ताखिलांगीचविचित्राभरणान्विता ५१ स्निहांकुरितरोमांचस्फुटीभूतमनोभवा संवेष्टितापरिजनैर्भोगोपकरणा
न्वितैः ५२ रशनारावमाधुर्यदीपिकानंगवैभवा चरणांबुजसंलग्नमणिमंजूरमंजुला ५३ एषाचमृदुसंस्पर्शैःकेशकंडूयनादिभिः प्रबो
धयतितद्वोधेप्रणयात्कुप्यतिक्षणं ५४ बाहुक्षिप्तेपलुलितस्रंसिधम्मिल्लमालिका चालितभ्रूविविकारादिविलासललितेक्षणा ५५ मैरे
याविदतस्वादमदस्खलितलज्जिता वेश्याभियातिदयितंचेटिभिःसहगर्विता ५६ प्रियकंकणनिःक्वाणमंजुल्यजनवीजनैः विबोध्यनि
र्भर्त्सयतेनासाभंगपुरस्सरं ५७ कृत्वासंकेतमप्राप्तेदयितेव्यथितातुया विप्रलब्धातुसाप्रोक्ताबुधैरस्यास्तुविक्रिया ५८ निर्वेदचिंताखेद
श्रुमूर्छानिःश्वसितादयः स्वायत्तासन्नदयिताहृष्टास्वाधीनभर्तृका ५९ अस्यास्तुचेष्टाःकथिताःस्मरपूजामहोत्सवाः पानकेलिजल
क्रीडाकुसुमावचयादयः ६० उत्तमामध्यमांसाश्चैवंसर्वाःस्त्रियस्त्रिधा अभिजातैर्नागरैर्गुणिभिर्याचकाम्यते ६१ खलातिकार
णेकोपमनुनीताप्रसीदति विदधत्साप्रियंप्रत्योस्वयमाचरतिप्रियं ६२ वक्तुनेसापराधेपितूष्णींतिष्ठतिसोत्तमा पुंसःस्वयंकामयतेकाम्यते
याचतैर्वधूः ६३ सक्रोधेक्रुध्यतिमुहुःसान्त्वितेनतवादिनां सापकारेपकर्त्रीस्यास्निग्धेस्निह्यतिवल्लभे ६४ एवमादिगुणोपेतामध्यमासा
प्रकीर्तिता अकस्मात्कुप्यतिरुषाप्रार्थितापिनमुंचति ६५ सुरूपंवाकुरूपंवागुणवंतमथागुणं स्थविरंतरुणंवापियाचकामयतेमुहुः ६६
ईर्षाक्रोधविषादेषुनियतासाधमामता स्वीयान्यसाधारणविधाद्विविधाचपरांगना ६७ वेषैस्तैकेवंषोडशधाता श्चवस्थाभिरष्टभिः एकैकम

ष्टधात्तासामुत्तमादिप्रभेदतः।६८।त्रैविध्यमेवंसचतुरंशीतस्त्रीशतीभवेत्॥अवस्थात्रयमेवेतिकेचिदाहुःपरस्त्रियः ६९ अवस्थैवपरस्त्री
स्यात्त्रयमेवंमदनोन्मना॥नत्तोभिसारिणीभूत्वाभिसरेतस्वयंव्रजेत्।७०संकेताच्चपरिभ्रष्टाविप्रलब्धाभवेत्पुनः पराधीनपतित्वेननान्या
वस्थापिसंगते॥७१॥आसांदूतीसखीचेटीभगिनीप्रतिवेशिनी॥धात्रेयिकाशिल्पकारीकुमारीकथिनीतथा ७२ कारुर्विप्रश्निकाचेतिनेत्र
मित्रगुणान्विता॥ ॥इतिनायिकाप्रकरणं॥ ॥ ॥अथोद्दीपनभावाः॥उद्दीपनञ्चतुर्धास्यादालंबनसमाश्रयात् गुणचेष्टालंकृ
तयस्तटस्थाश्चेतिभेदतः १ यौवनंरूपलावण्येसौंदर्यअभिरूपता मार्दवंसौकुमार्यंचेत्यालंबनगुणामताः २ सर्वासामेवनारीणांयौ
वनंतुचतुर्विधं प्रतियौवनमेतासांचेष्टितानिपृथक्पृथक् ३ ईषच्चपलनेत्रांतस्मरस्मेरमुखांबुजं सगर्वजरजोगंडमसमग्रारुणाधरं ४
लावण्योद्भेदरम्यांगंविलसद्भाविसौरभं उन्मीलितांकुरकुचमस्फुटांगकसंधिकं ५ प्रथमंयौवनंतत्रवर्तमानामृगेक्षणा अपेक्षतेमृदुस्प
र्शसहतेनोप्रतौरतिं ६ सखीकेलिरतासांगसंस्कारकलितादरा नकोपहर्षौलिजनसपत्नीदर्शनादिषु ७ नाभिरज्यतिकांतस्यसंगमेकिं
तुरज्यति स्तनौपीनौमृदुर्मध्यःपाणिपादस्यरक्तिमा ८ ऊरूकरिकरावंतंत्सक्रांगसांधिकं नितंबोविपुलोनाभिर्गंभीरोजघनंघनं॥ ९॥
व्यक्तारोमावलिःस्निग्ध्यमंगकेशरदक्षिषु द्वितीयंयौवनंतेनकलितावामलोचना १० सखीषुसुखप्रायलास्कस्निग्धाप्रायेणमानिनी। नम्र
मीदल्यनुनयेसपत्नीष्वल्पसर्पिनी। ११ नापराधान्विसहतेप्रणयेर्षाकषायिता रतिकेलिषुनुन्नताचेष्टतेगर्वितारहः १२ अस्निग्धतानयनयो
गंडयोर्म्लानकांतिता विच्छायतारवस्पर्शोप्यंगानांश्लथतामनाक् १३ अधरेमस्रुणारागःतृतीयेयौवनेभवेत् तत्रस्त्रीणामियंचेष्टारतितंत्र
विदग्धता १४ वल्लभस्यापरित्यागस्तदाकर्षणकौशलं अनादरोपराधेषुसपत्नीष्वमत्सरः १५ जर्जरत्वंस्तनश्रोणिगंडोरुजघनादिषु नि
र्मांसताचभवतिचतुर्थयौवनेस्त्रियः १६ तत्रचेष्टारतिविभावनुत्साहोहमर्षता सपत्नीष्वानुकूल्यंचकांतनाविरतास्थितिः १७ अथशृं
गारयोग्यत्वंरसाल्हादनकारणं आद्यद्वितीययोरवनत्तृतीयचतुर्थयोः १८ अंगान्यभूषितान्येवविक्षेपाद्यैर्विभूषणैः येनभूषित

वद्भांतितद्रूपमितिकथ्यते १९ मुक्ताफलेषुछायायास्तरलत्वमिवांतरा यदंगेभातिसौभाग्यंलावण्यंतदिहोच्यते २० अंगप्रत्यंगकानांयःसन्नि
वेशोयथोचित सुश्लिष्टसन्धिबंधस्यात्तत्सौंदर्यमुदीर्यते २१ यदात्मीयगुणोत्कर्षैर्वस्त्वन्यनिकटस्थिती सारूप्यंनयतिप्राज्ञैस्वाभिरूप्यंतदु
च्यते २२ यास्पर्शासहतांगेषुकोमलस्यापिवस्त्रनः स्पष्टंयथांगमुस्पृश्भिवस्यामार्दवंहितत् २३ तत्सौकुमार्यंतत्रेधास्यान्मुख्यमध्याध
मक्रमात् अंगपुष्पादिसंस्पर्शाल्सहंस्यादुत्तमंहितत् २४ नसहेतकरस्पर्शंयेनांगंमध्यमंमतं येनांगमातदीनामसहंतदिमहाधमं २५
अथालंकृतिः॥ चतुर्धालंकृतिर्वासोभूषामाल्यानुलेपनैः तटस्थाश्चंद्रिकाधाराधारचंद्रोदयावपि २६ कोकिलालापमाकंदमंदमारुतष
ट्पदाः लतामंडपभूगेहदीर्घिकाजलदारवाः २७ प्रासादगर्भसंगीतक्रीडाद्रिसरितादयः एवमुद्यायथोकालमुपभोगोपभोगिनः २८
अथानुभावाः॥ भावंमनोगतंसाक्षात्स्वहेतुंव्यंजयंतिये तेनुभावाइतिप्रोक्ताःकटाक्षेषत्स्मितादयः २९ तेचतुर्धाचित्तगात्रवाग्बुध्या
रंभसंभवाः।तत्रचभावाहेलाशोभाकांतिश्चदीप्तिच ३० प्रागल्भ्यंमाधुर्यंसौंदर्यौदार्यंचित्तताभावाः निर्विकारस्यचित्तस्यभावस्यादा
दिविक्रिया।ग्रीवारेचकसंयुक्तोभ्रूनेत्रादिविकारकृत् ३१ भावादीषत्प्रकाशोयसहावइतिकीर्त्यते नानाविकारैःसंयुक्तैःशृंगाराकृतिसू
चकैः।३२।हावएवभवेद्धेलालालितापिनयात्मिका साशोभारूपभोगाद्यैर्यत्स्यादंगविभूषणैः ३३ शोभैवकांतिराख्यातामन्मथाप्यायनो
ज्वला।कांतिरेववयोभोगदेशकालगुणादितः।३४ उद्दीपितातिविस्तारंयातादीप्तिरुच्यते निःशंकत्वप्रयोगेषुप्रागल्भ्यंपरिचक्षते ३५
माधुर्यंनामचेष्टानांसर्वावस्थासुमार्दवं।स्थिरांचित्तोन्नतिर्यातुतद्धैर्यमितिकथ्यते ३६ औदार्यंविनयंप्राहुःसर्वावस्थानुगंबुधाः॥ ॥
अथगात्रारंभाः॥लीलाविलासविच्छित्तिर्विभ्रमःकिलकिंचितं मोट्टायितंकुट्टमितंविब्बोकोललितंतथा ३७ विहृतंचेतिविज्ञेयायो
षितांदशगात्रजा॥ प्रियानुकरणंयत्तुमधुरालापपूर्वकः ३९ चेष्टितैर्गतिभिर्वास्यात्सालीलेत्यभिधीयते प्रियसंप्राप्तिसमयेभ्रूनेत्रान
नकर्मणां ४० तत्कालिकोविशेषोयःसविलासइतीरितः आकल्पकल्पनाल्पापिविच्छित्तिरतिकांतिकृत् ४१ एषागमनवेलायांमदनावेग

रसा. संभ्रमात् विभ्रमोंगविहारादिभूषास्थानविपर्ययः ।४२। शोकक्रुधाश्रुहर्षादेः संकरः किलकिंचितं ।स्वाभिलाषप्रकटनं मोट्टायितमुदीरितं ४३
केशाधरादिग्रहणे मोदमानापि चेतसा। दुःखितेव बहिः कुप्येद्यत्र कुट्टमितं हि तत् ।४४। इष्टेप्यनादरो गर्वान्मानाद्बिब्बोक ईरितः विन्यासभंगिरंगा
४ नां भ्रूविलासमनोहरा ।४५। क्रियया व्यंजिते यत्र विहृतं तदुदीरितं ॥ अथ पौरुषसात्विकाः॥ नीचेस्वाधिकस्पर्धा शौर्योत्साहौ च वक्रता
यत्र प्रकटतां याति सा शोभेति प्रकीर्तिता ।४७। वृषभस्येव गंभीरा गतिर्धीरं च दर्शनं सस्मितं च वचो यत्र स विलास इतीरितः ४८ तन्माधुर्यं य
त्र चेष्टा दृष्ट्यादेः स्पृहणीयता। श्रृंगारप्रचुरा चेष्टा यत्र तल्ललितं भवेत् ।४९॥ अथ वागारंभाः॥ आलापश्च विलापश्च संलापश्च प्रलापकः
अनुलापापलापौ च संदेशश्चातिदेशवान् ।५०। निर्देशश्चोपदेशश्चापदेशो व्यपदेशगः एवं द्वादशधा प्रोक्ता वागारंभा विचक्षणैः ५१ [illegible]
दृष्ट्यायोक्तिरालापो विलापो दुःखजं वचः ।उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्तितः ५२ व्यर्थालापः प्रलापः स्यादनुलापो मुहुर्वचः अप
लापस्तु पूर्वोक्तस्यान्यथा योजनं भवेत् ।५३। संदेशस्तु प्रोषितस्य स्ववार्ताप्रेषणं भवेत् अतिदेशो यदुक्तानि तदुक्तानीति यद्वचः ५४ निर्देशस्तु भ
वेत्सोयमहमित्यादिभाषणं। यच्छिक्षार्थं तु वचनमुपदेशः स उच्यते ।५५। अन्यार्थकथनं यत्र सोपदेश इतीरितः व्याजेनात्माभिलाषोक्तिर्य
त्रायं व्यपदेशकः ।५६॥ अथ सात्विकाः॥ अन्येषां सुखदुःखादिभावनं कृतभावनं अनुकूल्येन यच्चित्तं भावकानां प्रवर्तते ५७
सत्वं तदिति विज्ञेयं प्राज्ञैः सात्वोद्भवानिमान् सात्विकानिति जानंति भरतादिमहर्षयः ५८ सर्वेषां चैव भावानां यैश्च सत्वं विभाव्यते ते भावा
भावतत्वज्ञैः सात्विकाः समुदाहृतं ५९ स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः वैवर्ण्यमश्रु प्रलय इत्यष्टौ परिकीर्तिताः ६० स्तंभो हर्षभया
मर्षविषादाद्भुतसंभवाः अनुभावा भवंत्येते स्तंभे च मुनिसंमताः ६१ संज्ञाविरहितत्वं च शून्यतानिःप्रकंपता निदाघहर्षव्यायामश्रमक्रो
धभयादिभिः ६२ स्वेदः संजायते तत्र अनुभावा भवंत्यमी। स्वेदापनयवातेच्छा व्यजनग्रहणादयः ६३ रोमांचो विस्मयोत्साहहर्षाद्यैः स्त ४
त्र विक्रियाः रोमोद्गमोंगसंकोचगात्रसंस्पर्शनादयः ६४ वैस्वर्यं सुखदुःखाद्यैस्तत्र सुगद्गदादयः वेपथुर्हर्षसंत्रासजराक्रोधादिभि

डाक्टर भाऊदाजीइत्यास्यस्मारकम्
Dr. BHAU DAJI MEMORIAL

र्भवेत ॥६५॥ तत्रानुभावाः स्फुरणगात्रकंपादयो मताः॥ विषादातपरोषाद्यैर्वैवर्ण्यमुपजायते ॥६६॥ मुखवर्णपरावृत्तिः कार्श्या
द्यास्तत्र विक्रियाः॥ विषादरोषसंतोषधूमाद्यैरश्रुविक्रियाः॥६७॥ बाष्पबिंदुपरिक्षेपनेत्रसंमार्जनादयः॥ प्रलापो दुःखपाताद्यै
श्चेष्टाः तत्र निसंज्ञता॥६८॥ सर्वेपि सत्वमूलत्वाद्भावा ये त्वपि सात्विकाः॥ अथाप्यमीषां सत्वैकमूलत्वात्सात्विकप्रथा॥६९॥ अ
नुभावाश्च कथ्यंते भावसंसूचनादपि॥ एवं द्वैरूप्यमेतेषां कथितं भावकोविदैः॥७०॥ इति रसार्णवसुधाकरकारिकायां रंजको
नाम प्रथमो विलासः॥१॥ व्यभिइत्युपसर्गौ द्वौ विशेषाभिमुखत्वयोः॥ विशेषेणाभिमुख्येन चरंति स्थायिनं प्रति॥१॥ वागंग
सत्वयुक्ता ये ज्ञेयास्ते व्यभिचारिणः॥ संचारयंति भावस्य गतिं संचारिणोपि ते॥२ ॥उन्मज्जंते निमज्जंते स्थायिन्यंबुनिधाविव॥
ऊर्मीवद्वर्धयंतेनं यांति तद्रूपतां च ते॥३॥ निर्वेदोथ विषादो दैन्यं ग्लानिश्रमौ च मदगर्वौ॥ शंकात्रासावेगा उन्मादापस्मृती स्त
अं थाव्याधिः॥४॥ मोहो मतिरालस्यं जाड्यं व्रीडावहित्था च॥ स्मृतिरथ वितर्कचिंतामतिधृतयो हर्ष उत्सुकत्वं च॥५॥ औ
ग्र्यममर्षासूये चापल्यं चैव निद्रा च॥ सुप्तिर्बोध इतीमे व्याख्याता व्यभिचारिणस्त्रयस्त्रिंशत्॥६॥ तत्वज्ञानाद्वदौर्गत्या
द्यापदो विप्रयोगतः॥ ईर्ष्यादेरभिनैष्फल्यमिति निर्वेद उच्यते॥७॥ प्रारब्धकर्मानिर्वाहादिष्टानासेर्विपत्तितः॥ अपराध
परिज्ञानादनुतापस्तु या भवेत॥८॥ विषादः स त्रिधा ज्येष्ठमध्यमाधमसंश्रयात्॥ सहायान्वेषणोपायचिंताद्यास्तत्र उत्तमे
स्मृताः॥९॥ अनुतापश्च वैचित्यमित्याद्या मध्यमे मताः॥ अधमस्यानुभावाः स्युर्वैचित्यमवलोकनं॥१०॥ रोदनश्वसितं ध्यान
मुखशोषादयो मताः॥ दृष्टापद्दुर्गतत्वाद्यैरनौर्जित्यं हि दीनता॥११॥ तत्रानुभावा मालिन्यगात्रस्तंभादयो मताः॥ आधि
व्याधिजरातृष्णाव्यायामसुरतादिभिः॥१२॥ निःप्राणतांगग्लानिः स्यात्तस्यामंगवचनक्रिया॥ कंपानुत्साहवैवर्ण्यनयन
भ्रमणादयः॥१३॥ श्रमो मानसखेदः स्याद्ध्वनृत्यसुरतादिभिः॥ अंगमर्दननिश्वासौ पादसंवाहनं तथा॥१४॥ जंभ

एांमदपानंचमुखनेत्रविकर्षनं॥सीत्कृतिश्चेतिविज्ञेया अनुभावाःश्रमोद्भवाः॥१५॥मदस्त्वानंदसंमोहसमेदो मदिरा
कृतिः॥सत्रिधातरुणोमध्योपकृष्टश्चेतिभेदतः॥१६॥दृष्टिःस्मेरामुखेरागःसस्मिताकुलितंवचः॥ललिताविद्धग
त्याद्याश्चेष्टास्तुतरुणेमदे॥१७॥मध्येमेतुमदेवाचिस्खलनंदृष्टिघूर्णनं॥गमनेवक्रतावाह्वोविक्षेपःसंभ्रमाद
यः॥१८॥अपकृष्टेतुचेष्टास्युर्गतिभंगोविसंज्ञता॥निःष्ठीवनंमुहुःश्वासोहिक्काच्छर्द्यादयोमताः॥१९॥तरुणस्तुत
मादीनांमध्यमोमध्यनीचयोः॥अपकृष्टस्तुनीचानांतत्तन्मदविवर्द्धनं॥२०॥उत्तमःप्रकृतिःशेतेमध्योहसति
गायति॥ अधमप्रकृतिर्ग्राम्यंपरुषंवक्तिरोदिति॥२१॥ऐश्वर्यादिकृतःकश्चिन्मानोमदउदाहृतः॥वक्ष्यमा
णस्यगर्वस्यभेदएवेत्युदाह्महे॥२२॥ऐश्वर्यरूपतारुण्यकुलविद्यावलैरपि॥इष्टलाभादिनान्येषामवज्ञाग
र्वईरितः॥२३॥अनुभावाभवंत्यत्रगुर्वाद्याज्ञाव्यतिक्रमः॥अनुत्तरप्रदानंचवैमुख्यंभाषणेपिच॥२४॥विभ्र
मापह्नुतिर्वाक्यपारुष्यमनवेक्षणं॥अवेक्षणंनिजांगानांमंगतगाद्योपिच॥२५॥शंकाचौर्यापराधादेः
स्यानिष्टोत्प्रेक्षणंमताः॥तत्रचेष्टावहुःपार्श्वदर्शनंमुखशोषणं॥२६॥अवगुंठनचैववर्णकंठसादादयोपि
च॥द्विविधाचेयमात्मोत्थापरोत्थाचेतिभेदतः॥२७॥स्वस्थापिजनितात्मोत्थाप्रायोव्यंग्येपमिंगितैः॥इंगिता
निचपक्ष्मभ्रूतारकादृष्टिविक्रियाः॥२८॥परोत्थानुमताचेयंपरोत्थाकार्यतोभवेत्॥प्रायेणाकारचेष्टा
भ्यांतामिमामनुभावयेत्॥२९॥आकाराःसात्विकाश्चेष्टाअंगप्रत्यंगजाक्रियाः॥त्रासस्तुचित्तचांचल्यं
विद्युज्जलदगर्जितैः॥३०॥तथाभूतंभुजंगाद्यैर्विज्ञेयास्तत्रविक्रियः॥उत्कंपगात्रसंकोचरोमांचस्तंभगद्ग
दाः॥३१॥मुहुर्निमेषाविभ्रांतिपार्श्वस्थालंबनादयः॥ चित्तस्यसंभ्रमोयस्मादावेगोयंसचाष्टधा॥३२॥ ५

उत्पातवातवर्षाग्निमत्तकुंजरदर्शनात्॥प्रियाप्रियश्रुतेश्चापिशात्रवव्यसनादपि॥३३॥तत्रोत्पातास्तुशैलादि
कंपकेतूदयादयः॥तत्रसर्वांगविस्रंसोवैमनस्यापसर्पणं॥३४॥विषादमुखवैवर्ण्यविस्मयाद्यास्तुविक्रियाः॥
त्वरयागमनंवस्त्रग्रहणंचावगुंठनं॥३५॥नेत्रापमार्जनाद्याश्चवातावेगभवाःक्रियाः॥छत्रग्रहणसंकोचा
वाहुःस्वस्तिकबंधनं॥३६॥वृक्षाश्रयणमित्याद्यावर्षावेगभवाःक्रियाः॥अग्न्यावेगभवाश्चेष्टावीजनंचां
गधूननं॥३७॥विस्रस्तपदविक्षेपनेत्रसंकोचनादयः॥आवेगेकुंजरोद्भूतेसत्वरंचापसर्पणं॥३८॥
विलोकनंमुहुःपश्चात्त्रासकंपादयोमताः॥प्रियश्रवणजेप्यस्मिन्नभ्युत्थानोपगूहने॥३९॥प्रीतिदानंप्रि
यंवाक्यंरोमहर्षादयोपिच॥अप्रियश्रुतिजप्यस्मिन्विलापःपरिदेवनं॥४०॥आक्रंदभूमिपतनपरितोभ्रमणाद
यः॥चेष्टास्तुशात्रवोवेगेवर्मशस्त्रादिधारणं॥४१॥रथवाजिगजारोहसहसापतक्रमादयः॥एतेस्तुरुत्त
मादीनामनुभावापयोचितं॥४२॥उन्मादश्चित्तविभ्रांतिर्वियोगादीष्टनाशतः॥वियोगजेतुचेष्टास्युर्धावनं
परिदेवनं॥४३॥असंबद्धप्रलपनंतापनंसहसोत्थिता॥अचेतनैःसहालापोनिर्निमित्तस्थितादयः
॥४४॥इष्टनाशेकृतेतस्मीन्भस्मादिपरिलेपनं॥नृत्यगीत्यादिरचनातृणनिर्माल्यधारणं॥४५॥चीर
वरावरणादीनांप्रागुक्ताश्चापिविक्रियाः॥स्वोष्टदंशभुजास्फोटलालाफेनादयोपिच॥४६॥दोषवैषम्य
जस्त्वेषव्याधिरेवेत्युदाह्महे॥दोषोद्रेकवियोगाद्यैर्ज्वराद्याव्याधिरेवतु॥४७॥गात्रस्तंभःक्षुथांगवलंकुश
नंमुखकूजनं॥स्रस्तांगतांगविक्षेपःनिःश्वासाद्याःसतुद्विधा॥४८॥सशीतोदाहयुक्तश्चसशीतेतत्रवि
क्रियाः॥हनुसंचलनंवाष्पसर्वांगोत्कंपकूजनं॥४९॥जानुकंपनरोमांचमुखशोषादयोपिच॥दाहज्व

रेतुश्चेष्टास्तु शीतमाल्यादिवीक्षणं॥पाणिपादपरिक्षेपमुखशोषादयोपि च॥आपद्भीतिवियोगाद्यैर्मोहस्याच्चित्तमूढ
ता॥विक्रियातत्र विज्ञेयाइंद्रियाणांचशून्यता॥५३॥निश्चेष्टतांगभ्रमणपतनाघूर्णनादयः॥नसाधनजयाख्यस्य
वियोगोयमात्मनः॥५४॥शरीरविछेदवतांमरणं नाम तद्भवेत॥एतच्च द्विविधं ज्ञेयंव्याधिजंचापघातनं॥५५॥
अथवैसाध्यहृच्छूलविशूच्यादिसमुद्भवं॥अमीतत्रानुभावास्युरव्यक्ताक्षरभाषणं॥५६॥विवर्णगात्रतामं
दश्वासोक्षिस्तंभमीलने॥हिक्कापरिजनावेक्षानिश्चेष्टेंद्रियतादयः॥५७॥द्वितीयं घातपतनंदाहोद्बंधविष
दयः॥तत्रघातादिजे भूमिपातनक्रंदनादयः॥५८॥विषंतुवत्सनाभाख्यमष्टावेगाश्चदुद्भवा॥कार्श्यकंपोहिक्काफेन
श्चकंधराभंग॥५८॥जडतामतिरितिकथिताःक्रमशःप्रथमादिमाश्चेष्टाः॥स्वभावस्व प्रसौहित्यगर्भनिर्भतादि
भिःकृष्णाक्रियोन्मुखलेयतदालस्यामिहाक्रियाः॥६०॥अंगभंगःक्रियाद्वेषोजृंभणाक्षिविमर्दनं॥शय्यासनैकक्रियया
निद्रातंद्रादयोपि च॥६१॥जाप्रमम तिपत्तिःस्यादिष्टानिष्टार्थयोश्रुतेः॥दृष्टेर्वाविरहादेश्च क्रियास्तत्रामेषता॥६२॥
अश्रुनिपावश्संचतूर्णींभावादयोपि च॥अकार्यकरणावज्ञास्तुतिर्नूतर्नसंगमे॥६३॥प्रतीकाराक्रियोद्वेश्च व्रीडाव
नवधष्टता॥तत्रचेष्टानिगूढोक्तिरधोमुखविचिंतने॥६४॥अनिर्गमोवहिश्चापिदूरादेवावगूहनं॥नखानां
कृंतनंभूमिखेलनंवैवमादयः॥६५॥अवहित्थाकारगुप्तिःस्या   वनीतिभिः॥लज्जासाध्वसदाक्षिण्यप्रगल्भा
पचमादिभिः॥६६॥अन्यथाकथनंमिथ्याधैर्यमन्यत्रवीक्षणं॥रथाभंगादयोप्यस्यामनुभावाभवंत्यमी॥६७॥स्वा
स्थ्यचिंताद्दढाभ्याससदृशालोकनादिभिः॥स्मृतिपूर्वानुभूतार्थप्रतीतिस्तत्र विक्रिया॥६८॥कंपनोद्वहनेमूर्ध्नोभ्रू ६
विक्षेपादयोपि च॥ऊहोनितर्कःसंदेहःवितर्कप्रत्ययादिभिः॥६९॥जनितोनिर्णयांतःस्यादसत्यःसत्यएव वा॥तत्रा

नुभावाःस्युरमीभ्रूशिरःकंपनादयः॥७०॥इष्टवस्त्वपरिप्राप्तेरैश्वर्यभ्रंशनादिभिः॥चिंताध्या॥नामिकातस्यामनुभा
वाद्रमेमताः॥७१॥कार्श्याधोमुखसंतापनिश्वासोच्छ्वासनादयः॥नानाशास्त्रार्थमथनादर्थनिर्द्धारणंमतिः॥७२॥
तत्रचेष्टास्फकर्तव्यकरणसंशयाछिदा॥शिष्योपदेशाक्षेपाद्यूहापोहादयोपि च॥७३॥ज्ञानविज्ञानगुर्वादिभक्ति
नानार्थसिद्धिभिः॥लज्जादिभिःस्वचित्तस्यनैस्पृबंधतिरुच्यते॥७४॥अत्रानुभावाविक्षेपाप्राप्तार्थानुभवस्तथा॥अप्रा
प्तातीतनष्टार्थैरभिसंरोधनादयः॥७५॥मनोरथस्यलाभेनसिद्ध्ययोग्यस्यवस्तुत॥मित्रसंगमदेवादिप्रसादश्चप्र
कल्पितः॥७६॥मनःप्रसादोहर्षःस्यादत्रनेत्रप्रफुल्लता॥प्रियभाषणमाश्लेषपुलकानांप्ररोहणं॥७७॥स्वेदोद्गमः
स्वहस्तेनहस्तसंताडनादयः॥कालाक्षमत्वमौत्सुक्यमिष्टवस्तुवियोगतः॥७८॥तद्दर्शनाद्रम्यवस्तुदिदृक्षादिस्तु
तक्रियाः॥त्वरानवास्थितीशय्यास्थितीरुत्थानचिंतने॥७९॥शरीरगौरवंनिद्रातंद्रानिश्वसितादयः॥अ
पराधावमानाभ्यांचौर्यादिग्रहणादपि॥८०॥असत्प्रलापनांद्यैश्च कृतंचंडत्वमुग्रता॥क्रियातत्रास्यनयनरागो
बंधनताडनैः॥८१॥शिरसःकंपनंस्वेदधर्षनिर्भर्त्सनादयः॥अवक्षेपावमानाद्यैःक्रोधोमर्षइतीर्यते॥८२॥त
त्रस्वेदशिरःकंपावधोमुखविचिंतने॥उपायान्वेषणोत्साहव्यवसायादयःक्रियाः॥८३॥परसौभाग्यसंपत्तीविद्या
शौर्यादिहेतुभिः॥गुणेषुदोषारोपस्यादसूयातत्रविक्रियाः॥८४॥मुखापवर्जनंगर्हाभ्रूविधानोदनादयः॥रागद्वे
षादिभिश्चित्तलापवंचापलंभवेत॥८५॥चेष्टास्तत्र वि॰॰विचारेणपरिरंभावलंभनेनिष्कासनोक्तिपारुष्यता
उनाजापनादयः॥८६॥मदस्वभावव्यायामनिश्चिंतत्वश्रमादिभिः॥मनोनिमीलनंनिद्राश्चेष्टास्तत्रास्यगौरवं
॥८७॥आघूर्णमाननेत्रत्वमंगानांपरिमर्दनं॥निश्वासोपसितेसन्नगात्रत्वं नेत्रमीलनं॥८८॥शरीरस्यवसंको

चोजाप्रं चेत्येवमादयः॥ उद्रेक एव निद्रायाः सुप्तिः स्यात्तत्र विक्रिया॥ ८९॥ इंद्रियोपरतिर्नत्रमीलनं स्रस्तगात्र
ता॥ उत्स्वप्नायितनैश्चाल्यश्वासोच्छ्वासादयोपि च॥ ९०॥ स्वप्नस्पर्शननिःश्वासा निद्रासंपूर्णतादिभिः॥ प्रबो
धश्चेतनाप्राप्तिश्चेष्टास्तत्राक्षिमर्दनं॥ ९१॥ शय्याविमोक्षणं बाहुविक्षेपोंगुलिमोटनं॥ शिरःकंडूयनं चा गव
लनं चैवमादयः॥ ९२॥ उत्तमाधममध्येषु सात्विकव्यभिचारिणः॥ विभावैरनुभावैश्च वर्णनीया यथोचि
तं॥ ९३॥ उद्वेगस्नेहदंभेर्ष्याप्रमुखाश्चित्तवृत्तयः॥ उक्तेष्वंतर्भवंतीह तिन पृथक्केन दर्शिताः॥ ९४॥ अन्ये पि पदि भा
वास्तु श्चिकावृत्तिविशेषतः॥ अंतरभावस्तु सर्वेषां इष्टव्यो व्यभिचारिणां॥ ९५॥ विभावा अनुभावाश्च ते भवंति
परस्परं कार्यकारणभावस्तु ज्ञेयः प्रायेण लोकतः॥ ९६॥ स्वातंत्र्यात्पारतंत्र्याद्विद्विधामी व्यभिचारिणः॥ परपो
षकतां प्राप्ताः परतंत्रा इतीरिताः॥ ९७॥ तदभावे स्वतंत्रास्युर्भावा इति चं ते स्मृताः॥ आभासता भवेदेशामनैचिं
त्यविवर्त्तिनां॥ ९८॥ असत्यत्वादयोग्यत्वादनौचित्यं द्विधा भवेत॥ असत्यत्वकृतं तस्यादचेतनकृतं तु युत॥ ९९॥
अयोग्यत्वकृतं प्रोक्तं पशुतिर्यगसाश्रयं॥ उत्पत्तिसंधिसबलशांतयो व्यभिचारिणः॥ १००॥ दशाश्च तत्रत्वस्तः
स्यादुत्पत्तिर्भावसंभवः॥ सरूपमसरूपं वा भिन्नकारणकल्पितं॥ १॥ भावद्वयं मिलति चेत्स संधिरिति गीयते॥
अत्याहूढस्य भावस्य विलासः शांतिरुच्यते॥ २॥ अबलत्वं तु भावानां समर्द्दः स्यात्परस्परं॥ इति संचारिणः॥
अथ स्थायिनः॥ सजातियविजातीयैर्भावैर्यैर्न तिरस्कृताः॥ क्षीराब्धिलवनं पत्रन्यास्त्यामलं स्थापिनो हि ते॥ १॥
भरतेन च ते कथिता रतिर्हासोत्साह विस्मय क्रोधाः॥ शोको चाथ जुगुप्सा भयमित्यष्टौ च लक्ष्मवक्ष्यते तेषां॥ २॥
यूनोरन्योन्यविषया स्थायिनी या रतिर्भवेत॥ निसर्गेणाभियोगेन संसर्गेणाभिमानतः॥ ३॥ उपमाध्यात्मवि

षयैरेषा स्यात्तत्र विक्रियाः॥ कटाक्षभंगविक्षेपप्रियवादादयो मताः॥ ४॥ अंकुरपल्लवकलिकाप्रसूनफ
लभोगयेक्रमशः॥ प्रेयानुप्रणयः स्नेहो रागोनुराग इत्युक्तः॥ ५॥ सप्रेमा भेदरहितं यूनोर्यद्भावबंधनं॥ यत्तु प्रेमा
नुबंधनेस्यातं त्य हृदयंगमं॥ ६॥ वधातिभावकौटिल्यं समान इति गीयते॥ बाह्यांतरोपचारैर्यः प्रेमामानो
पकल्पितः॥ ७॥ तनोतिभावविस्रंभं सोयं प्रणय तु च्यते॥ विश्वं परमां काष्ठां वमास्कंदे दर्शनादिभिः॥ ८॥ यत्र द्रवंसं
तरंगः स स्नेह इति कथ्यते॥ सात्रिधा कथ्यते प्रौढमध्यमंदप्रभेदतः॥ ९॥ प्रवासादिभिरज्ञातक्लिष्टतो प्रियेजने
इतरक्लेशाकारी यः स स्नेहं प्रौढ उच्यते॥ १०॥ इतरानुभावापेक्षां सहते यः समध्यमः॥ द्वयोरेकस्य मानादौ तदं
न्यस्य करोति यः॥ ११॥ वैवापेक्षीन चोपेक्षां स स्नेहो मंद उच्यते॥ दुःखमप्याधिकं चित्ते सुखत्वे नैव रज्यते॥ १२॥
यदि स्नेहं प्रकर्षेण स राग इति कथ्यते॥ कुसुंभनीलमंजिष्ठाराग भेदेन स त्रिधा॥ १३॥ कुसुंभरागो यैं ज्ञेयो
यश्चित्ते सज्जति तत्क्षणात॥ अतिप्रकाशमानो पि क्षणादेव विनश्यति॥ १४॥ नीलरागस्तु स प्रोक्तो नापे
ति न च दीप्यते॥ अचिरेणैव सक्तः कदाचि[illegible]दपि नश्यति॥ १५॥ अतिवशोभते यस्मान्मांजिष्ठाराग उच्य
ते॥ राग एव स्वसंवेद्यं दशा प्राप्त प्रकाशितं॥ १६॥ यावदाश्रयवृत्तिश्चेदनुराग इतीरितः॥ अन्ये प्रीति
स्तेभेदमामनंति न तत्त्वतः॥ १७॥ असंप्रयोगविरहासे यं हर्षान्त भियते॥ भाषणाकृतिवेषाणां क्रियायाश्च विकार
तः॥ १८॥ लौभ्यादेश्च परस्थानामेषामनुकृतेरपि॥ विकारश्चेतसो हासः तत्र चेष्टाः समीरिताः॥ १९॥ दृष्टेर्विकारश्चेष्टा
स्य कपालस्पंदनादयः॥ शक्तिधैर्यसहायाधैः फलश्लाघ्येषु कर्मसु॥ २०॥ सत्वरामनुषोत्कतिरुत्साहस्तत्र विक्रियाः॥
कालाद्यवेषणं धैर्यं बागारंभादयोपि च॥ २१॥ सहजाहार्यभेदेन स द्विधा परिभाष्यते॥ लोकोत्तरपदार्थानां सहजालोक

रसा॰ स॰ का॰ नादिभिः॥२२॥ विस्तारश्चेतसो यस्तु विस्मयः स निगद्यते॥ क्रियास्तत्राक्षिविस्तारसाधूक्तिपुलकादयः॥२३॥ वधा
८ वज्ञादिभिश्चित्तज्वलनं क्रोध ईरितः॥ एष त्रिधा भवेत्क्रोधः कोपरोषप्रभेदतः॥२४॥ वधछेदादिपर्यंतः क्रोधः क्रूरजनाश्रयः॥
शत्रुभृत्यसुहृत्पूज्याश्चत्वारो विषयास्तयोः॥२५॥ मुहुर्दष्टोष्ठता भुग्नाभ्रुकुटिर्दंतघट्टनं॥ हस्तनिष्पीडनं गात्रकंपः श
स्त्रप्रतीक्षणं॥२६॥ स्वभुजावेक्षणं कंठगर्जाघाताः शात्रवे क्रुधि॥ भृत्यक्रोधे तु चेष्टाः स्युस्तर्जनं मूर्द्धकंपनं॥२७॥ निभ
र्त्सनं च बहुधा मुहुर्निर्वर्णनादयः॥ मित्रक्रोधो विकारास्तु नेत्रांतस्खलनाश्रुता॥२८॥ तूष्णींध्यानं च नैश्चल्यं श्वासि
तानि मुहुर्मुहुः॥ मौनं विनम्रमुखता भुग्नदृष्ट्यादयोपि च॥२९॥ पूज्यक्रोधे तु चेष्टाः स्युः स्वनिंदा नम्रवक्रता॥ अनुत्त
रप्रदानां गस्वेदगद्गदतादयः॥३०॥ क्रोधवत्कोपविषयाश्चत्वारोत्र समीरिताः॥ शत्रुकोपे तु चेष्टाः स्युः [illegible] भ्रो
वगर्भितभाषणं॥३१॥ भ्रूभेदकुटिलस्वेदकटाक्षारुणितादयः॥ भृत्यादिकोपत्रितये तत्र क्रोधोदिताः क्रियाः॥३२॥
मिथः स्त्रीपुंसयोरेव रोषः स्त्रीगोचरः पुनः॥ प्रणयावधिरत्र तु विकाराः कुटिलेक्षणं॥३३॥ अधरस्फुरणापांगरा
गनिःश्वासितादयः॥ द्वेधा निगदितः स्त्रीणां रोषः पुरुषगोचरः॥३४॥ सपत्नीहेतुराद्यः स्यादन्यः स्यादहेतुकः॥ स
पत्नीहेतुजो रोषो विप्रलंभे प्रपंच्यते॥३५॥ [illegible]॥ अन्यहेतुकृते तत्र क्रिया पुरु
षरोषवत्॥ बाष्पाक्रमो मुखे रोषस्तंभार्त्तिश्वसितादयः॥३६॥ उत्तमानामयं प्रोढो विभावैरन्यसंश्रयैः॥ अस्म
स्थैरपि गूढोपि प्रायो धैर्येण शाम्यति॥३७॥ तत्र चेष्टा गुणाख्याननिगूढरुदितादयः॥ स्यादेष मतिपर्यंतः स्व
परस्थैश्च मध्यमैः॥३८॥ अनतिव्यक्तरुदितप्रमुखास्तत्र विक्रियाः॥ हेतुभिः स्वगतैरेव प्रायः स्त्रीनीचयोरयं॥४०॥
विक्रियाः कथिताः प्रायस्तत्र भूरिविचेष्टितं॥ उत्तरस्तननिर्भेदयानोच्चैःरोदनादयः॥४१॥ अहृद्यानां पदार्थानां

दर्शनश्रवणादिभिः॥ संक्षोभणं यन्मनसः सा जुगुप्सात्र विक्रिया॥४२॥ नासापिधानं त्वरिता गतिरास्यविकूणनं॥ स
र्वांगकूणनं कुत्सा मुहुर्निष्ठीवनादयः॥४३॥ घृणा शुद्धजुगुप्सा स्याद्दशरूपेनिरूपिता॥ साहेयश्रवणेसन्ना जुगुप्सा च
नभिद्यते॥४४॥ भयं तु तुमुलाद्घोरदर्शनश्रवणादिभिः॥ चित्तस्यातीव चांचल्यं तत्प्रायो नीचमध्ययोः॥४५॥ तूत्तम-
स्य तु जायेत कारणैरतिलौकिकैः॥ भये तु चेष्टा वैवर्ण्यं स्तब्धत्वं गात्रकंपनं॥ पलायनं पराद्रक्षावीक्षणं स्वात्मगु
गोपनं॥ पास्यशोषणमुत्क्रोशशरणान्वेषणादयः॥४७॥ एते च स्थायिनस्तैस्तैर्विभावैर्व्यभिचारिभिः॥ सात्वि
कैरनुभावैश्च नयाभिनययोगतः॥४८॥ साक्षात्कारमिवानीताः प्रापिताः स्वानुरूपतां॥ सामाजिकानां मनसि
प्रयांति रसरूपतां॥४९॥ दध्यादिव्यंजनैश्चिंतां मरीचादिभिरोषधैः॥ गुडादिमधुरद्रव्यैर्यथायोग्यं समन्वितैः
॥५०॥ यद्वत्पाकविशेषणवधो खंडरसोपराः॥ निष्पाद्यते विभावाद्यैः प्रयोगे सातयांधसः॥५१॥ सोपमानंदसंभेदो
भावकैरनुभूयते॥ अष्टधा स च शृंगारहास्यौ वीराद्भुतावपि॥५२॥ रौद्रकरुणबीभत्सौ भयानक इतीरितः॥ एषूत्त
रस्तु पूर्वस्यात्संभूतो विषमात्समः॥५३॥ बहुवक्तव्यताहेतोः सकलाह्लादनादपि॥ रसेषु तेषु शृंगारः प्रथमं लक्ष्यते स्फु
टं॥५४॥ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः॥ नीतास्वाद्यरसत्वं रतिः शृंगार उच्यते॥५५॥ स विप्रलं
भः संभोग इति द्वेधा निगद्यते॥ अयुक्तयोस्तरुणयोर्योनुरागः परस्परं॥५६॥ अभीष्टालिंगनादीनामनवाप्तौ प्र
जायते॥ स विप्रलंभो विज्ञेयः स चतुर्द्धा निगद्यते॥५७॥ पूर्वानुरागमानौ च प्रवासकरुणावपि॥ यत्प्रेमसंगमा
त्पूर्वं दर्शनश्रवणोद्भवं॥५८॥ पूर्वानुरागः स विज्ञेयः श्रवणं तु गुणस्मृतिः॥ प्रत्यक्षचित्रस्वप्नादौ दर्शनं दर्शनं
मतं॥५९॥ यस्तु पूर्वानुरागोयं संकल्पात्मा प्रवर्त्तते॥ सोयं पूर्वानुरागाख्यो विप्रलंभ इतीरितः॥६०॥ पारतं

९ न्याद यं हे ह्यादैवमानुषकल्पितात्॥ अत्र संचारिणो भ्रांतिशंकासूयेश्रमो भयं॥६१॥ निर्वेदौत्सुक्यदैन्यानि चिंता निद्रा प्रबुद्धता॥ वि
षादो जडतोन्मादौ मोहो मरणमेव च॥६२॥ एतास्मिन्नभिलाषादिमरणांतमनेकधा॥ तत्र संचारिभावानामुत्कटत्वाद्दशा भवेत्॥६३॥ तथापि प्राक्
नै रस्याद्दशावस्था समासतः॥ प्रोक्तास्तदनुरोधेन तासां लक्षणमुच्यते॥६४॥ अभिलाषश्चिंतनानुस्मृतिगुणकीर्तनोद्वेगाः॥ सविलापउन्माद
व्याधिजडता मृतिश्च ताः क्रमशः॥६५॥ संगमोपायरचितमारब्धव्यवसायतः॥ संकल्पेच्छासमुद्भूतिरभिलाषोत्र विक्रियाः॥६६॥ प्रवेशनिर्गमौ
तूष्णीं तद्दृष्टिपथगामिता॥ रागप्रकाशनपरा श्रेष्ठा स्वात्मप्रसाधनं॥६७॥ व्याजोक्तयश्च विजने स्थितिरित्यादयो मता॥ केनोपायेन
संश्लिष्येत्कदा तेन समागमः॥६८॥ दूतीमुखेन किं वाच्यमित्याद्यूहस्तु चिंतनं॥ अत्र नीलादि संस्पर्शः शय्यायां परिवर्तनं॥६९॥ सबाष्पके
करादृष्टि मुद्रिकादिविवर्तनं॥ निर्लक्ष्यवीक्षणं चैवमाद्या विक्रियका मता॥७०॥ अर्थानामनुभूतानां देशकालानुवर्तिनं॥ सातत्येन पराम
र्शो मानसः स्यादनुस्मृतिः॥७१॥ अत्रानुभावा निश्वासो ध्यानं कल्पविहीनता॥ शय्यासनादिविद्वेष इत्याद्याः समरकल्पिताः॥७२॥
सौंदर्यादिगुणश्लाघा गुणकीर्तनमत्र हि॥ रोमांचो गद्गदा वाणी चाश्रु मंथर वीक्षणं॥७३॥ तत्संगाचिंतने संख्यागं दुःखदादयोपि च॥
मनसः कंपउद्वेगः कथितास्तत्र विक्रिया॥७४॥ चित्रसंतापनिश्वासौ द्वेषः स्वकचंदनादिषु॥ स्तंभचिंताश्रु वैवर्ण्यदीनत्वादय ईरिताः॥७५॥
अहमेद्य कथं प्राप दिहातिष्ठदिहास्त च॥ इहालपदिहावात्सीदिदैवस्थास्यते कृता॥७६॥ इत्यादिवाक्यविन्यासो विलाप इति कीर्तितः॥
तत्र चेष्टास्तु कुत्रापि गमनं क्वचिदीक्षणं॥७७॥ क्वचित्तु चिरवस्थानं क्वचिच्च भ्रमणादयः॥ सर्वावस्थासु सर्वत्र तन्म स्तुतया सदा॥७८॥ अ
न्यस्मिन्नदितिभ्रांतिरुन्मादो विरहोद्भवः॥ अत्र चेष्टास्तु विज्ञेया द्वेषास्लिष्टेपि वस्तुनि॥७९॥ दीर्घमुहुश्च निःश्वासो निर्निमेषतयास्थितिः
॥ अनिमित्तास्मितध्यानज्ञानमौनादयोपि च॥८०॥ अभीष्टसंगमाभावाद्व्याधिसंतापलक्षणः॥ अत्र संतापनिःश्वासौ ज्ञानवस्त्रनिवेषणं॥८१॥ ९
नोत्तरं भाषते प्रश्ने नेक्षते नशृणोति च॥ यत्र ध्यायति निःसंज्ञं जडता सा प्रकीर्तिता॥८२॥ अकांडहुंकृतिः स्तंभो निश्वासकृशतादयः॥ तैस्तैः कृतैः

प्रतीकारैर्यदि न स्यात्समागमः॥८३॥ ततस्त्वान्मरणोद्योगः कामाग्नेस्तत्र विक्रियाः॥ लीलांशुकवकोरादिविन्यासः स्निग्धशीकरे॥८४
॥ कलकंठकलालापश्रुतिर्मंदानिलाश्रयः॥ ज्योत्स्नाप्रवेशमाकंरमंजरीवीक्षणादयः॥८५॥ मुहुः कृतोने तिनेति प्रतिषेधार्थवीक्षया॥
ईप्सिता लिंगनारीनां निरोधो मान उच्यते॥८६॥ सोयं सहेतुनिर्हेतुभेदाद्द्विधात्र हेतुजः॥ ईर्ष्यया संभ ह्रीर्षामन्यासंगिनि वल्लभे॥८७॥ अ
सदिष्णुत्वमेवास्या दृष्टेरनुमितेः श्रुतेः॥ ईर्ष्याभाने तु निर्वेदावहित्थाग्लानिदीनताः॥८८॥ चिंताचापलजडतामोहाद्या व्यभिचारिणः॥ श्रु
तिः प्रियापराधस्य श्रुतिराप्तसुखीमुखात्॥८९॥ भोगांकगोत्रस्खलनात्स्वप्नैरनुमितिस्त्रिधा॥ कारणाम संभूतिर्निर्हेतुः स्याद्द्वयोरपि॥
९०॥ अवहित्थादयस्तत्र विज्ञेया व्यभिचारिणः॥ निर्हेतुकः स्वयं शाम्येत्स्वयं ग्राह्यस्मितावधीः॥९१॥ हेतुत्रस्तु समेयातिपथायोग्यं प्रकल्पितैः॥
साम्नादानेन भेदेन मित्युपेक्षा रसांतरैः॥९२॥ तत्र प्रियोक्तिकथनं यत्तत्साम कीर्त्यते॥ सख्यादिभिरुपालंभ त्रभेदो भेद उच्यते॥९३॥ व्याजेन
भूषणादीनां प्रदानं दानमुच्यते॥ नतिः पादप्रणाम स्यात्तूष्णीं स्थितिरुपेक्षणं॥९४॥ आकस्मिकभयादीनां कल्पना स्याद्रसांतरं॥ वाहि
कं बुद्धिपूर्वमिति द्विधात उच्यते॥९५॥ अनुकूलेन दैवेन कृतं स्याद्दाहिकं भवेत्॥ प्रत्युत्पन्नधिया यं सा कल्पितं बुद्धिपूर्वकं॥ पूर्वसंगतयोर्यूनोर्भवे
द्देशांतरादिभिः॥ करणव्यवधानं यत्स प्रवास इतीरितः॥९७॥ तत्कृतो विप्रलंभोपि प्रवासत्वेन संमतः॥ गर्वेहर्षमदव्रीडावर्जयित्वा समीरितः॥
९८॥ शृंगारयोग्याः सर्वेपि प्रवासे व्यभिचारिणः॥ कार्यतः संभ्रमाच्छापात्सन्निपातत्र कीर्तिनः॥९९॥ बुद्धिपूर्वं तथा यूनोः सन्निधानाद्यपेक्षया
॥ वृत्तो वर्तिष्यमाणश्च वर्तमान इति त्रिधा॥ आवेगः संभ्रमः सोपि नैकोदिव्यादिभेदतः॥ स तु वैरूप्यताद्रूप्य प्रवृत्तो पंचिधो भवेत्॥१००॥
प्रवासशापवैरूप्याद्दिव्या गौतमादिषु॥ द्वयोरेकस्य मरणे पुनः संजीवनावधि॥१॥ विरहः करुणान्यस्य संगमाशानिवर्तनात्॥ करु
णभ्रमचारित्वात्सोयं करुण उच्यते॥२॥ संचारिणोनुभावास्तु करुण पि प्रवासवत्॥ पूर्वानुरागो विविधवचनव्रीडनादिभिः॥३॥ मानेविरुत्सं
तत्याद्वः पनरीर्षादिरुत्तवभिः॥ व्याबध्यदीर्घकालत्वात्प्रवासेन तल्लीयते॥४॥ विनिषिद्धं तु करुणे करुणत्वे न गीयते॥ स्पर्शनालिंगनादीनामा

१० नुकूल्यान्निषेवणं॥१०॥ घटते यत्र यूनोः स संभोगोयं चतुर्विधः॥ संक्षिप्तः संकीर्णः संपन्नतरः समृद्धिमानिति च॥ पूर्वानुराग
मानात्प्रवासकरुणानुसंभवः क्रमशः॥६॥ यूवानौ यत्र संक्षेपात्साधसंक्रीडनादिभिः॥ उपचारानिषेवेते स संक्षिप्त उदाहृतः॥७॥
संकीर्णस्तु प्रसादेपि व्यलीकस्मरणादिभिः॥ संकीर्णमानसंभोगः किंचितप्तेसुपेशलः॥८॥ भयं व्यलीकस्मरणाद्यभावात्प्राप्तवैभवः॥ प्रोषि
तागतयोर्यूनोर्भोगः संपन्न ईरितः॥९॥ पुनरुज्जीवताभोगो समृद्धिः क्रियताभवेत्॥ शिवाभ्यामेव विज्ञेयामितियोहि समृद्धिमान्॥१०॥ अथ हास्यः
॥ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः॥ हासः सरस्य त्वं नीतो हास्य इतीर्यते॥११॥ अत्रालस्यग्लानिनिद्राबोधाद्या व्यभिचारिणः॥ एष द्वि
धा भवेदात्मपरस्थितिविभेदतः॥१२॥ आत्मस्थस्तु यदा स्वस्य विकारैर्हसति स्वयं॥ परस्थस्तु परप्राप्तैरेतैर्हसति चेत्परः॥१३॥ अतिवशात्सव सो
ढा स्मितहसितविहसितोपहसितैः॥ अपहसितातिहसितके त्वेष्ठातिक मादिमेद्दुद्दु॥१४॥ स्मितत्वाल्लस्यदशनं दृक्कपोलविलासकृत॥ तदेव ल
क्ष्यदशनाशिखिरं हसितं भवेत्॥१५॥ तदेवाकुंचितापांगगंडमधुरनिःस्वनं॥ कालोचितं चास्यरागयुक्तं विहसितं भवेत्॥१६॥ फुल्लनासापुटं यस्या
त्रिकुंचितशिरोंसकं॥ जिह्मावलोकिनयनं तच्चापहसितं भवेत्॥१७॥ कंपितांसं साश्रुनेत्रं तच्चोपहसितं भवेत्॥ करोपगूढपार्श्वं यदुच्छतायतनिःस्वनं॥१८॥ बाष्पा
कुलाक्षवदनं तच्चापिहसितं मतं॥ अथ वीरः॥ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः॥१९॥ नीतः सदस्मरस्यत्वं उत्साहो वीर उच्यते॥ स चत्रिधा समासेन दानयुध
दयोद्भवः॥ दानवीरे धृतिर्हर्षोद्याद्या व्यभिचारिणः॥२१॥ स्मितपूर्वाभिभाषित्वं स्मितपूर्वं च वीक्षणं॥ प्रसादेवकुदातृत्वं दत्वा चानकुशोचनं॥२२॥ गुणागुणविचारयाद्या
स्त्वनुभावाः समीरिताः॥ युद्धवीरे हर्षगर्वामर्षाद्या व्यभिचारिणः॥२३॥ असहायेपि युद्धे त्वासमरादपलायनं॥ भीताभयप्रदानाद्या विकारास्तत्र कीर्तिताः॥२४॥ दयावीरे धृति
मतिप्रमुखा व्यभिचारिणः॥ स्वार्थप्राणव्ययेनापि विपन्नत्राणशीलता॥२५॥ आश्वासनोक्तयः स्थैर्यमित्याद्यास्तत्र विक्रियाः॥ अथाद्भुतः॥ विभावैरनुभावै
श्च सात्विकैर्व्यभिचारिभिः॥ नीतस्सदस्यरस्यत्वं विस्मयोद्भुततां व्रजेत्॥२६॥ अत्र धृत्यावेगहर्षजाड्याद्या व्यभिचारिणः॥ चेष्टास्तु नेत्रविस्तारस्वेदाश्रुपुलकादयः॥२७ १०
॥ अथ रौद्रः॥ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः॥ क्रोधः सदस्यरस्यत्वं नीतो रौद्र इतीर्यते॥२८॥ आवेगगर्वश्रमामर्षमोहाद्या व्यभिचारिणः॥ प्रस्वेदभ्रुकुटीनेत्ररागा

द्यास्तत्र विक्रियाः॥२९॥ अथ करुणः॥ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः॥ नीतः सदस्यरस्यत्वं शोकः करुण उच्यते॥३०॥ अत्राष्टौ सात्विका जाड्यानिर्वेदग्लानिदीन
ताः॥ आलस्यापस्मृतिव्याधिमोहाद्या व्यभिचारिणः॥३१॥ अथ बीभत्सः॥ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः॥ जुगुप्सा योषमापन्ना बीभत्सत्वेन रस्यते॥३२॥ अत्र ग्ला
निस्त्रसोन्मादमोहापस्मारदीनताः॥ विषादचापलावेगगर्वाद्या व्यभिचारिणः॥३३॥ स्वेदरोमांचनासाग्रछादनाद्याश्च विक्रियाः॥ अथ भयानकः॥ विभावैरनुभावैश्च सात्विकै
र्व्यभिचारिभिः॥ भयं सदस्यरस्यत्वं नीतः प्रोक्तो भयानकः॥३५॥ तत्र संत्रासमरणे चपलावेगदीनताः॥ विषादमोहापस्मारशंकाद्या व्यभिचारिणः॥३६॥ विक्रियाश्चास्य शेषा
द्या सात्विकाश्चाश्रुवर्जिताः॥ केचित्समानबलयोरसयोः संकरं विदुः॥३७॥ न परीक्षाक्षममिदं मतं प्रेक्षावतां व्रजेत्॥ तुल्यत्वे पूर्वमास्वादकृतरत्वविनिश्चयात्॥३८॥ स्प
र्धापरत्वादुभयोरसास्वादप्रसंगतः॥ तयोरन्यतरस्यैव प्रायेणास्वादनादपि॥३९॥ युगपद्रसनीयत्वं युगपन्नोपपद्यते॥ एषामंगांगिभावेन संकरो मम संमतः॥४०॥ त
था च भारतीये॥ भावे वापि रसो वापि प्रवृत्तिर्वृत्तिरेव वा॥ सर्वेषां समवेतानां रूपं यस्य भवेद्बहु॥४१॥ स मंतव्यो रसस्थायी शेषाः संचारिणो मताः॥ रतिस्तु लाघवतत्समत
बो लस्मात्सकरुणादिना॥ भावितात्स्वर्यविश्रांते रेकत्रैवावलोकनात्॥ उभौ शृंगारबीभत्सौ मथोवीरभयानकौ॥ रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः॥४३॥ स्वभाववैरि
णोरंगांगभावेनापि विमिश्रणं॥ विवेकिभ्यो न सहते गंधगंधकयोरिव॥४४॥ विरोधिनोपि नोदध्यादतिरस्कारकक्षणं॥ शोषणं प्रकृतस्यैव चेदंगत्वं न तावता॥४५॥ अकिंचिदु
पकारित्वादंगस्यांगत्वमंगिनि॥ न तत्वं निधिमात्रेण चर्वणा — वसरतः॥४६॥ अन्यथा पानकादेषु शर्करादेरिवापते॥ अंतरापतितस्यापि तृणादेरूपकारिका॥४७॥ तत्व
र्णाभिमानस्यात्सतृणाभ्यवहारिणि॥ न वैरिणोरभ्यांगांगिभावात्स्यात्स्वादभावना॥४८॥ मत्स्ययोर्नायकस्येव निसर्गद्वेषिणोरपि॥ अंगयोरंगिनो व्यौभवेदेकत्र संगतिः॥४९॥
अथ रसाभासः॥ अंगेनांगिरसस्येच्छा वृत्तिर्वर्तिसंपदा॥ अमात्येनाविनीतेन स्वामिभावासतां व्रजेत्॥५०॥ न वा च भावत्र काशिकायां शृंगारो हास्यभूयिष्ठः शृंगाराभास ईरि
तः॥ अद्भुतः करुणाश्लेषाद्भुताभास इष्यते॥५१॥ रौद्रः शोकभयाश्लेषाद्रौद्राभास ईरितः॥ करुणो हास्यभूयिष्ठः करुणाभास इष्यते॥५२॥ बीभत्सोद्भुतशृंगारो
बीभत्साभास इष्यते॥ स्यादुभयानकाभासो रौद्रबीभत्ससंगमात्॥५३॥ इति श्रीरसार्णवकारिकायां रसोल्लासो नाम द्वितीयो विलासः समाप्तः॥ शुभं भवतु॥ ॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक